# Vadhugitayam Dhyeyasya Shri Hareh Sarvarpanastotradipradarshanam

# વધૂગીતાયાં ધ્યેયસ્ય શ્રીહરેઃ સર્વાર્પણસ્તોત્રાદિપ્રદર્શનમ્

## Document Information

Text title : Vadhugitayam Dhyeyasya Shri Hareh Sarvarpanastotradipradarshanam

File name : vadhUgItAyAMdhyeyasyashrIhareHsarvArpaNastotrAdipradarshanam.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 57/60-107||

Latest update : February 28, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2026

*sanskritdocuments.org*

Vadhugitayam Dhyeyasya Shri Hareh Sarvarpanastotradipradarshanam

# વધૂગીતાયાં ધ્યેયસ્ય શ્રીહરેઃ સર્વાર્પણસ્તોત્રાદિપ્રદર્શનમ્

(પુરુષોત્તમપ્રોક્તમ્)-
સંસારબન્ધનાન્મુક્તિમિચ્છન્ યઃ કોઽપિ દેહવાન્ ।
સ્તુત્વા ધ્યાત્વા પૂજયિત્વા માં હરિં સમ્પ્રમુચ્યતે ॥ ૬૦॥

લક્ષ્મિ! નિત્યં બલં પ્રાપ્યં મમ સર્વાવતારિણઃ ।
અક્ષરેશં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૧॥

શઙ્ખચક્રગદાપદ્મધારિણં પરમેશ્વરમ્ ।
અન્તઃસ્થિતં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૨॥

મીનશૂલધ્વજધનુઃસ્વસ્તિચક્રશરાન્વિતમ્ ।
શ્રીવત્સાઙ્કં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૩॥

કમ્ભરાશ્રીસુતં કૃષ્ણનારાયણં પ્રિયં પતિમ્ ।
ગોપાલજં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૪॥

બ્રહ્મપ્રિયાપતિં હરિપ્રિયાપતિં સતીપતિમ્ ।
શ્રીપતિં સમ્પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૫॥

રાધારમાપતિં લક્ષ્મીરમાપદ્માવતીપતિમ્ ।
માણિકીશં પ્રપ્રન્નોઽસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૬॥

કમલાદુઃખહાલક્ષ્મીપતિં નારાયણીપતિમ્ ।
શિવજેશં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૭॥

દિવ્યાદેવીપતિં કીરાપતિં કામોદકાપતિમ્ ।
સુશીલેશં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૮॥

લીલાવતીખશીનાથં હુણ્ડિકાગણિકાપતિમ્ ।
હંસિકેશં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૬૯॥

અશોકસુન્દરીનાથં વિકલેન્દુમતીપતિમ્ ।
ભિલ્લીશં સમ્પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૦॥

રક્ષાપ્રજ્ઞાશમીશ્રદ્ધાનાથં મુક્તપતિં હરિમ્ ।
મમ કાન્તં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૧॥

કૃષ્ણં રામં રામકૃષ્ણં નારસિંહં જનાર્દનમ્ ।
રાજરાજં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૨॥

વારાહં વામનં વિષ્ણું માધવં કેશવં પતિમ્ ।
કાન્તકાન્તં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૩॥

કપિલં ચ હરિં વાસુદેવં જનાર્દનં શિવમ્ ।
અક્ષરેશં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૪॥

અનન્તશિરસં કૃષ્ણં સનાતનં પરં પતિમ્ ।
બ્રહ્મયોનિં પ્રપન્નાસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૭૫॥

પ્રેમરસં હરેર્નિત્યં પિબામિ પાર્શ્વવર્તિની ।
હરેઃ પાદં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૬॥

હરેસ્તામ્બૂલજં મિષ્ટં રસં સુગન્ધસમ્ભૃતમ્ ।
પિબામિ તં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૭॥

અમૃતાખ્યં પ્રસાદં ચ નિત્યમાસ્વાદયામિ ચ ।
ઓષ્ઠરસં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૮॥

શ્રીહરેઃ શયનં પ્રાપ્તા મહાનન્દં વહામિ ચ ।
આન્તરસ્થં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૭૯॥

આક્ષરં બલમાપ્તાઽસ્મિ નિત્યં સુખં ગતાઽસ્મિ ચ ।
એકાત્માનં પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૮૦॥

તાદાત્મ્યસુખમાપન્ના રહસ્યાનન્દભોગિની ।
તદ્ભાવં ચ પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૮૧॥

મૃત્યોઃ પિતા મહાકાલો યેન સૃષ્ટોઽસ્મિ યદ્વશઃ ।
તં પ્રભું સમ્પ્રપન્નાસ્મિ કિં માં મૃત્યુઃ કરિષ્યતિ ॥ ૮૨॥

ઇત્યેવં શ્રીહરેર્મે વૈ મદમાપ્તા પ્રિયા મમ ।
નિર્ભયા સેવતે માં ચાશ્રુતે સર્વં સુખં મમ ॥ ૮૩॥

સા ધન્યા સા સફલાર્થા સા ચ સર્વસુખસ્થિતા ।
સફલં જીવિતં તસ્યાઃ સ્તૌતિ યા પુરુષોત્તમમ્ ॥ ૮૪॥

ૐ નમોઽક્ષરવાસાય મુક્તસેવ્યાય તે નમઃ ।
ૐ નમશ્ચેશ્વરેશાયાઽવતારેશાય તે નમઃ ॥ ૮૫॥

ૐ નમો મુક્તપતયે સતાં ચ પતયે નમઃ ।
ૐ નમોઽક્ષરપતયે મુક્તાનીપતયે નમઃ ॥ ૮૬॥

નમસ્તે પરમાનન્દ નમસ્તે પરમાઽક્ષર ।
નમસ્તે નિત્યસર્વજ્ઞ નમસ્તે જ્ઞાનમુક્તિદ ॥ ૮૭॥

નમસ્તે ચાત્મવાસાય નમસ્તે પુરુષોત્તમ ।
સર્વાન્તરાત્મરૂપાય નારાયણાય તે નમઃ ॥ ૮૮॥

નમસ્તે કમ્ભરાપુત્ર ગોપાલજાય તે નમઃ ।
નમસ્તે શ્રીપતે કૃષ્ણનારાયણ ચ તે નમઃ ॥ ૮૯॥

નમસ્તે કુઙ્કુમવાપીનિવાસાયાઽબ્ધિશાયિને ।
બ્રહ્મપ્રિયાધિપતયે હરિપ્રિયાપ્રિયાય ચ ॥ ૯૦॥

જય સત્યજગત્સાક્ષિન્ જય સર્વપુમર્થદ ।
જય વેદાન્તવેદ્યસ્ત્વં જય કાન્ત મનોહર ॥ ૯૧॥

જય સૂક્ષ્મચિદાનન્દ જય ચિત્તનિરઞ્જન ।
જય નાથ જય સર્વ જય શાન્તસનાતન ॥ ૯૨॥

ત્વં ગુરુસ્ત્વં હરે કાન્તત્વં સ્વામી ત્વં મમાધિપઃ ।
ધર્મજ્ઞાનાદયસ્ત્વં મે ત્વં મે વિષ્ણુઃ પ્રમોક્ષદઃ ॥ ૯૩॥

ત્વં પ્રભુસ્ત્વં સમુદ્ધર્તા ત્વં પાતા ત્વં પ્રલુમ્પકઃ ।
ત્વં શ્રીઃ પુષ્ટિસ્ત્વં ચ લક્ષ્મીસ્ત્વં પ્રભા ત્વં ચ માણિકી ॥ ૯૪॥

ત્વં ક્ષેત્રજ્ઞઃ પરેશશ્ચ ત્વં યજ્ઞસ્ત્વં હુતાશનઃ ।
તવ રૂપમિદં સર્વં પરબ્રહ્મ ત્વમીશ્વરઃ ॥ ૯૫॥

અવતારાત્મકમૂર્તિં તે ભજન્તિ દિવૌકસઃ ।
ભજને પૂજને પાને ભોજને પુરુષોત્તમ ॥ ૯૬॥

ક્ષન્તુમર્હસિ દેવેશ યત્કૃતં ન કૃતં મયા ।

ન શક્નોમિ સદા કર્તું પૂજાં સમ્યક્ ક્ષમસ્વ મામ્ ॥ ૯૭॥

યત્ કૃતં જપહોમાદિ હ્યસાધ્યં પુરુષોત્તમ ।
ન્યૂનં પૂર્ણં મમ મત્વા નિજાં માં સ્વીકુરુ પ્રભો ॥ ૯૮॥

દિવારાત્રૌ ચ સન્ધ્યાયાં સર્વાવસ્થાસુ મે પ્રભો ।
અચલા વૈ ત્વયિ ભક્તિસ્તવાઙ્ઘ્રિયુગલે સ્થિતિઃ ॥ ૯૯॥

ઇતિ સ્તોત્રેણ માં નાથં ભક્ત્યેડિષ્વ નરાયણિ ।
યદિચ્છસિ મમાનન્દં ભજ ભક્ત્યા જગદ્ગુરુમ્ ॥ ૧૦૦॥

પ્રાતર્જપેદિદં સ્તોત્રં સ્મરન્તં પુરુષોત્તમમ્ ।
સ્વર્ગં મોક્ષં સમ્પદં ચ સર્વાન્ કામાનવાપ્નુયાત્ ॥ ૧૦૧॥

પુત્રાર્થી લભતે પુત્રાન્ બદ્ધો મુચ્યેત બન્ધનાત્ ।
કન્યાર્થિની લભેત્ કન્યાં કન્યા શુભં પતિં લભેત્ ॥ ૧૦૨॥

રોગાદ્વિમુચ્યતે રોગી નિર્ધનો લભતે ધનમ્ ।
જાતિસ્મરત્વં મેધાવી વિદ્યાર્થી જ્ઞાનમર્જયેત્ ॥ ૧૦૩॥

જઘન્યશ્ચાપિ મૂર્ધન્યસ્ત્વસાધુઃ સાધુસત્તમઃ ।
શઠોઽપિ સત્યવાક્ સ્યાચ્ચ યઃ સ્તૌતિ પુરુષોત્તમમ્ ॥ ૧૦૪॥

સર્વધર્મબહિષ્કૃતા અપિ તે સાધવો મતાઃ ।
યેષાં પ્રવર્તનં સર્વં હરિમુદ્દિશ્ય જાયતે ॥ ૧૦૫॥

નાઽઽશૌચં વિદ્યતે તસ્યા યસ્યા ભક્તિઃ પરેશ્વરે ।
મનો વાગ્વર્ષ્મ સર્વસ્વં મયા ક્ષિપ્તૌ હરૌ ત્વિહ ॥ ૧૦૬॥

આરાધ્ય સર્વદા કૃષ્ણનારાયણં સુખપ્રદમ્ ।
નરો નારી ચ વા ષણ્ઢઃ પ્રાપ્નોતીહ સુવાઞ્છિતમ્ ॥ ૧૦૭॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
 ૫૭-અધ્યાયાન્તર્ગતં વધૂગીતાયાં ધ્યેયસ્ય શ્રીહરેઃ
 સર્વાર્પણસ્તોત્રાદિપ્રદર્શનં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૫૭/૬૦-૧૦૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 57/60-107..

Proofread by PSA Easwaran

*Vadhugitayam Dhyeyasya Shri Hareh Sarvarpanastotradipradarshanam*
pdf was typeset on February 28, 2026

Please send corrections to *sanskrit@cheerful.com*